श्री त्रिपुरसुंदरी प्रातः स्मरणं

श्री त्रिपुरसुंदरी प्रातः स्मरणं

प्रातर्नमामि जगतां जनन्याश्चरणांबुजं |
श्रीमत्त्रिपुरसुंदर्या वंदिताया हरादिभिः || 1 ||

प्रातस्त्रिपुरसुंदर्याः व्रजामि चरणांबुजं |
हरिर्हरो विरिंचिश्च सृष्ट्यादीन् कुरुते यया || 2 ||

प्रातस्त्रिपुरसुंदर्याः नमामि पदपंकजं |
यत्पाद्यमंबु शिरसि भाति गंगा महेशितुः || 3 ||

प्रातः पाशांकुश शर चापहस्तां नमाम्यहं |
उद्यदादित्यसंकाशां श्रीमत्त्रिपुरसुंदरीं || 4 ||

प्रातर्नमामि पादाब्जं ययेदं भासते जगत् |
तस्यास्त्रिपुरसुंदर्याः यत्प्रसादान्निवर्तते || 5 ||

यः श्लोक पंचकमिदं प्रातर्नित्यं पठेन्नरः |
तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुंदरी || 6 ||

त्रैलोक्यचैतन्यमये परेशि
श्रीनाथनित्ये भवदाज्ञयैव |
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्तयिष्ये || 7 ||

संसारयात्रामनुवर्तमानं
त्वदाज्ञाया श्रीत्रिपुरे परेशि |
स्पर्धा तिरस्कार कलिप्रमाद
भयानि मामभिभवंतु मातः || 8 ||

जानामि धर्मं न च मे प्रवृत्तिः
जानाम्यधर्मं न च मे निवृत्तिः |
त्वया हृषीकेशि हृदिस्थयाऽहं
यथा नियुक्तोऽस्मि तथा करोमि || 9 ||

इति श्री त्रिपुरसुंदरी प्रातः स्मरणं |